त्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा । उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा । साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा । प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा” चिन्तामणिः । ४अलङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम् ।

**हेतुता** स्त्री हेतोर्भावः तल् । १हेतुत्वे कार्य्याव्यवहितपूर्व्वक्षणे नियतकार्य्याधिकरणवृत्तित्वरूपे कारणत्वे २सङ्गतिविशेषे च “हेतुतावसरस्तथा” इति प्राञ्चः ।

**हेतुमत्** त्रि० हेतुरस्त्यस्य मतुप् । कार्य्ये स्त्रियां ङीप् ।

**हेत्वपह्नुति** अलङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम् ।

**हेत्वन्तर** गौतमोक्ते निग्रहस्थानभेदे । “अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्” गौ०सू० तल्लक्षणमुक्तं “परोक्तदूषणोद्दिधीर्षया तत्रैव हेतौ पूर्व्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनम् । यथा शब्दोऽनित्यो बाह्येन्द्रियप्रत्यक्षत्वादित्युक्ते सामान्ये नैकान्तिकत्वेन च प्रत्युक्ते सामान्यवत्त्वे सतीति विशेषणम् । प्राञ्चस्तु, हेतौ विशेषणदान एव हेत्वन्तरमित्याहुः” गौ०वृ० ।

**हेत्वसिद्धि** स्त्री असिद्धिभेदे स्वरूपासिद्धिरूपहेत्वाभासभेदे

**हेत्वाभास** पु० हेतुरिव आभासते आ+भास–अच्, हेतोर्वा आभासः आ+भास–घञ् । न्यायोक्ते १दुष्टे हेतौ २हेतुदोषे च । स च दोषः पञ्चविधः व्यभिचारः विरुद्धता असिद्धिः सत्प्रतिपक्षता बाधश्च । तादृशदोषेषु सत्सु अनुमितिर्नोदेति । यस्य हि ज्ञानमनु[illegible]तिबन्धकं स हेत्वाभासः । अत्र हेतुनामाभास इति व्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वम् । तल्लक्षणञ्च हेत्वाभासत्वम् तच्च अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् । यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिविरोधित्वं तत्त्वम् । ज्ञायमानं सद् यदनुमितिप्रतिबन्धकं तत्त्वम् । यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तस्तदुत्तरमनुमितावनाहार्य्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वम् । केचित्तु, यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वमिति प्राहुः” दीधि० । हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमानाः” वाचस्प० “पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेण भासमानः” गौ० वृ० । “पक्षधर्मत्वादीनां पञ्चानां रूपाणां मध्ये एकेनापि रूपेण हीनो हेतुः । सोऽपि कतिपयहेतुरूपयोगाद्धेतुवदवभासमानः” त० भा० । असाधको हेतुत्वेनाभिमतः । यथा वायुर्गन्धवान् स्नेहादित्यादौ स्नेहो हेत्वाभासः । स च हेत्वाभासः । पञ्चधा सव्यभिचारः । विरुद्धः । प्रकरणसमः । साध्यसमः अतीतकालः” गौ० सू० पर्य्यायान्तरेण हेत्वाभासः पञ्चधा “असिद्धः विरुद्धः । अनैकान्तिकः । प्रकरणसमः । कालात्ययापदिष्टः । पर्य्यायान्तरेणापि हेत्वाभासः पञ्चधा । सव्यभिचारः । विरुद्धः । असिद्धः । सत्प्रतिपक्षितः बाधितः इति ।

**हेम** न० हि–मन् । १स्वर्णे २धुस्तूरे अमरः ३नागकेशरे राजनि० । ४माषकपरिमाणे च पु० विश्वः ५कृष्णवर्णाश्वे । ६बुधग्रहे च पु० ज्यो० ।

**हेमकन्दल** पु० हेमवर्णं कन्दं लाति ला–क । प्रवाले हेमच० ।

**हेमकान्ति** स्त्री हेम्न इव कान्तिरस्याः । १दारुहरिद्रायाम् राजनि० । २स्वर्णतुल्यद्युतियुक्ते त्रि० । ६त० । ३स्वर्णस्य दीप्तौ स्त्री ।

**हेमकार** पु० हेम तन्मयं भूषणं करोति कृ–अण् । स्वर्णकारे वर्णसङ्करजातिभेदे (सेकरा) । [राजनि० ।

**हेमकिञ्जल्क** न० हेमेव पीतं किञ्जल्कं यस्य । नागकेशरे

**हेमकूट** पु० हेममयः कूटो यस्य । किंपुरुषवर्षस्थे हिमालयादुत्तरस्थे पर्वतभेदे अमरः । [राजनि० ।

**हेमकेतकी** स्त्री हेमेव पीतकेतकी । स्वर्णकेतक्याम्

**हेमकेलि** पु० १अग्नौ शब्दमा० । २चित्रकवृक्षे च [राजनि०

**हेमक्षीरी** स्त्री हेम इव पीतं क्षीरं यस्याः । स्वर्णक्षीर्य्याम्

**हेमगन्धिनी** स्त्री हेम्नः नागकेशरस्येव गन्धोऽस्त्यस्याः इनि ङीप् । रेणुकाख्ये गन्धद्रव्ये रत्नमा० ।

**हेमगिरि** पु० हेममयो गिरिः १सुमेरुपर्वते २नैरृतस्थे देशभेदे वृ०सं० कूर्मविभागशब्दे २१६८ पृ० दृश्यम् ।

**हेमगौर** पु० हेमेव गौरः पीतः पुष्पेण । १अशोकवृक्षे राजनि० २स्वर्णतुल्यपीते त्रि० । [लकवृक्षे च

**हेमज्वाल** पु० हेमेव ज्वाला यस्य । १अग्नौ शब्दमा० । २चि-

**हेमतार** न० हेम तारयति उत्कृष्टं करोति तॄ–णिच्–अण् । तुत्थे हेमच० ।

**हेमदुग्धक** पु० हेमवर्णं दुग्धं निर्यासोऽस्य कप् । १उडुम्बरे वृक्षे अमरः । २स्वर्णक्षीर्य्यां स्त्री जटा० कब